# Shri Sharadamanivandana

# શ્રીશારદામણિવન્દના

## Document Information

Text title : Shri Sharadamanivandana

File name : shAradAmaNivandanA.itx

Category : deities_misc, gurudev, rAmakRiShNa

Location : doc_deities_misc

Author : Yatindra Vimala Chaturdhurina

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીશારદામણિવન્દના

માતા ગુરુભ્યાં પરમો ગુરુર્મતઃ,
 સા દૈવતાનાં પરમં ચ દૈવતમ્ ।
સર્વાશ્રયાણાં પરમાશ્રયોઽપિ સા,
 તુલ્યં જનન્યા ન તતોઽસ્તિ ભુવને ॥ ૧॥

વિલોક્ય તીર્થાણિ સહસ્રવારં
 પ્રજાયતે યત્ ફલમત્ર લોકે ।
ફલં તતઃ કોટિ-ગુણાધિકં સ્યાત્
 સકૃન્મુખાવલોકનતો જનન્યાઃ ॥ ૨॥

શ્રુત્વા હરેર્નામ સહસ્રબારં
 પ્રજાયતે યત્ ફલમત્ર લોકે ।
ફલં તતઃ કોટિગુણાધિકં સ્યાત્
 શ્રી નામ્ન આકર્ણનતો જનન્યાઃ ॥ ૩॥

સહસ્રબારં શ્રુતિ-મન્ત્રપાઠાત્
 પ્રજાયતે યત્ ફલમત્ર લોકે ।
ફલં તતઃ કોટિગુણાધિકં સ્યા-
 ચ્છ્રીનામ્ન ઉચ્ચારણતો જનન્યાઃ ॥ ૪॥

સહસ્રકૃત્વોઽમર-વિગ્રહાઙ્ઘ્રિ
 સ્પર્શેન યાવત્ ફલમત્ર લોકે ।
ફલં તતઃ કોટિ ગુણાધિકં સ્યાત્
 માતુઃ સકૃચ્છ્રીપદ-સઙ્ગ્રહેણ ॥ ૫॥

જનની મમ ધરણી-સમ સર્વસહન-સારા ।
સ્વીકૃત-નત-સન્તતિ-શત-પાલન-વર-ભારા ॥ ૬॥

અમ્બ ! સદયમૃચ્છ હૃદય-જાત-કુસુમ-ગુચ્છમ્ ।

ક્વ સુરસદ્મ ચરણ-પદ્મ-વિરહિત મતિ તુચ્છમ્ ॥ ૭॥

વીતાશન-પાન-ગમન-શયનાસન-શોકમ્ ।
જનનિ ! બહસિ નિજવક્ષસિ દુર્દમપિ તોકમ્ ॥ ૮॥

માતા મમ કરુણા-કમ-મૂર્તિઃ શમ-ધાત્રી ।
પ્રતિ જનુરનુસરતુ વિતનુ પુત્રમમૃત-પાત્રી ॥ ૯॥

પરમ-જનનિ દૈત્ય-દલનિ મોક્ષ-ધરણિ ધન્યે ।
વિતર વિતર મઙ્ગલકરચાચલેશ્વર-કન્યે ॥ ૧૦॥

બ્રહ્મ-મહિષિ પરમ-વિદુષિ ચિન્મયિ ચિર-સત્યે ।
જ્ઞાન-વિભવમર્પય ભવ-જલધિ-તરણ-કૃત્યે ॥ ૧૧॥

હૃદયં મમભેદ-વિષમ-વોધ-વિધુરમન્ધમ્ ।
મૃગયતિ સતિ હત-નિર્વૃતિ ભવતીમનુસન્ધ્યમ્ ॥ ૧૨॥

ધરણી-શરણી ભવાબ્ધિ તરણી બન્ધ-મોક્ષ-કારિણી ।
નમામિ ચરણે ત્રિતાપ-તારિણી મલિન-મરણ-હારિણી ॥ ૧૩॥

કોટિ-સૂર્ય-શોભા-સારિણી, કોટિ-ચન્દ્ર-ભારિણી ।
કોટિ-તારક-કિરણ ધારિણી, કોટિ-ગ્રહ-વિચારણી ॥ ૧૪॥

વિમલ-હાસિની કનક-કાશિની દિવ્યધામવાસિની ।
શ્રી શારદામણિઃ નિત્યાનન્દખનિઃ સુધા-રસ-નિર્ઝરિણી ॥ ૧૫॥

ભુવનાદરિણી ભવનાભરણી જનની શારદામણિઃ ।
તનયા તાપિની સદા-વિલાપિની પાદ-રેણુ-કામિની ॥ ૧૬॥

નૌમિ શ્રી શારદામણિં ! નૌમિ શ્રી શારદામણિં !! નૌમિ શ્રી શારદામણિં !!!
॥ ૐ શાન્તિઃ ॥

ઇતિ ડૉ રમાચતુર્ધુરિણ્યાવિરચિતા શ્રીશ્રીશારદામણિવન્દના સમ્પૂર્ણા ।

Proofread by Aruna Narayanan

*Shri Sharadamanivandana*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*